सात्म्याद्रोगादीनां व्यवस्थितम् । द्रव्यं नेच्छन्ति भिषज इच्छन्ति स्वस्थरक्षणे । द्वयोरन्यतरादाने वदन्ति विषदुग्धयोः । दुग्धस्यैकान्तहिततां विषमेकान्ततोऽहितम् ॥ एवं युक्तरसाद्येषु द्रव्येषु सलिलादिषु । एकान्तहिततां विद्धि वत्स ! सुश्रुत ! नान्यथा ॥

अतोऽन्यान्यपि संयोगादहितानि वक्ष्यामः ॥ न च विरूढधान्यैर्वसामधुपयोगुड़माषैर्वा ग्राम्यानूपौदकपिशितादीनि चाभ्यवहरेत् । न पयोमधुभ्यां रोहिणीशाकं जातु शाकं वाश्नीयात् । बलाकां वारुणीकुल्माषाभ्याम् । काकमाचीं पिप्पलीमरिचाभ्यां, नाड़ीभङ्गशाककुक्कुटदधीनि च नैकध्यम् । मधु चोष्णोदकानुपानं पित्तेन वा मांसानि । सुराकृशरपायसांश्च नैकध्यम् । सौवीरकेण सह तिलशष्कुलीम् । मत्स्यैः सहेक्षुविकारान् । गुड़ेन काकमाचीं, मधुना मूलकं, गुड़ेन वाराहं, मधुना च सह विरुद्धम् । क्षीरेण मूलकम् । आम्रजाम्बवश्वाविच्छूकरसगोधाश्च सर्व्वांश्च मत्स्यान्विशेषेण चिलिचिमं पयसा । कदलीफलं तालफलेन, पयसा, दध्ना, तक्रेण वा । लकुचफलं पयसा, दध्ना, माषसूपेन वा मधुना, घृतेन च प्राक् पयसः पयसोऽन्ते वा ।

अतः कर्म्मविरुद्धान् वक्ष्यामः ॥ कपोतान् सर्षपतैलभृष्टान्नाद्यात् । कपिञ्जलमयूरलावतित्तिरिगोधाश्चैरण्डदार्वग्निसिद्धा एरण्डतैलसिद्धा वा नाद्यात् । कांस्यभाजने दशरात्रपर्य्युषितं सर्पिर्म्मधु चोष्णैरुष्णे वा । मत्स्यपरिपचने शृङ्गवेरपरिपचने वा सिद्धां काकमाचीम् । तिलकल्कसिद्धमुपोदिकाशाकम् । नारिकेलेन वराहवसापरिभृष्टां बलाकाम् । भासमङ्गारशूल्यं नाश्नीयादिति ॥

अतो मानविरुद्धान् वक्ष्यामः ॥ मध्वम्बुनी मधुसर्पिषी मानतस्तुल्ये नाश्नीयात् । स्नेहौ मधुस्नेहौ जलस्नेहौ वा विशेषादान्तरीक्षोदकानुपानौ ।

अत ऊर्द्धं रसद्वन्द्वानि रसतो वीर्य्यतो विपाकतश्च विरुद्धानि वक्ष्यामः । तत्र मधुराम्लौ रसवीर्य्यविरुद्धौ मधुरलवणौ च मधुरकटुकौ च सर्वतः । मधुरतिक्तौ रसविपाकाभ्यां मधुरकषायौ चाम्ललवणौ रसतः । अम्लकटुकौ रसविपाकाभ्यामम्लतिक्तावम्लकषायौ च सर्व्वतः । लवणकटुकौ रसविपाकाभ्यां लवणतिक्तौ लवणकषायौ च सर्व्वतः । कटुतिक्तौ रसवीर्य्याभ्यां कटुकषायौ तिक्तकषायौ च रसतः । तरतमयोगयुक्तांश्च भावानतिरूक्षानतिस्निग्धानत्युष्णानतिशीतानित्येवमादीन् विवर्जयेत् । भवन्ति चात्र ॥

विरुद्धान्येवमादीनि रसवीर्य्यविपाकतः । तान्येकान्ताहितान्येव शेषं विद्याद्धिताहितम् ॥ व्याधिमिन्द्रियदौर्बल्यं मरणञ्चाधिगच्छति । विरुद्धरसवीर्य्यादीन् भुञ्जानोऽनात्मवान्नरः ॥ यत्किञ्चिद्दोषमुत्क्लेश्य भुक्तं कायान्न निर्हरेत् । रसादिष्वयथार्थं वा तद्विकाराय कल्पते ॥ विरुद्धाशनजान् रोगान् प्रतिहन्ति विरेचनम् । वमनं शमनं वापि पूर्व्वं वा हितसेवनम् ॥ सात्म्यतोऽल्पतया वापि दीप्ताग्नेस्तरुणस्य च । स्निग्धव्यायामबलिनां विरुद्धं वितथं भवेत् ॥ व्यायामशीलो बलवान् शिशुश्च स्निग्धोऽग्निमांश्चापि महाशनश्च । आप्नोति रोगान्न विरुद्धजातानभ्यासतो वाऽल्पतया च जन्तुः । अथ वातगुणान् वक्ष्यामः ॥

पूर्व्वः समधुरः स्निग्धो लवणश्चैव मारुतः । गुरुर्विदाहजननो रक्तपित्ताभिवर्द्धनः ॥ क्षतानां विषजुष्टानां बलिनः श्लेष्मलाश्च ये । तेषामेव विशेषेण सदा रोगविवर्द्धनः ॥ वातलानां प्रशस्तश्च श्रान्तानां कफशोषिणाम् । तेषामेव विशेषेण व्रणक्लेदविवर्द्धनः ॥ मधुरश्चाविदाही च कषायानुरसो लघुः । दक्षिणो मारुतः श्रेष्ठश्चक्षुष्यो बलवर्द्धनः । रक्तपित्तप्रशमनो न च वातप्रकोपणः ॥ विशदो रूक्षपरुषः खरः स्नेहबलापहः । पश्चिमो मारुतस्तीक्ष्णः कफमेदोविशोषणः । सद्यः प्राणक्षयकरः शोषणस्तु शरीरिणाम् ॥ उत्तरो मारुतः स्निग्धो मृदुर्म्मधुर एव च । कषायानुरसः शीतो दोषाणामप्रकोपणः ॥ तस्माच्च प्रकृतिस्थानां क्लेदनो बलवर्द्धनः । क्षीणक्षयविषार्त्तानां विशेषेण तु पूजितः" इति सु० १,२० ।

**अपद्** त्रि० न पद्यते ज्ञायते पद—कर्म्मणि क्विप् न०त० । अज्ञेये । "गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न पद्यसे" इति शत०ब्रा० १४,८,१५,१० । नास्ति पादोऽस्याः पादोऽन्त्यलोपः कुम्भ० ङीप् पादः पच्च । पादशून्यायां स्त्रियाम् । पुंसि तु अन्त्यलोपो "न ङीप् । अपाद् । "आपादशीर्षा गूहमान" इति ऋ० ४, १,११ । "अपादहस्तोऽपृतन्यदिन्द्रमिति" ऋ०१,३२,७ । "अथ यदपात् समभवत्तस्मादहिरिति" शत०ब्रा० । 'अपादपाणिर्जवनोग्रहीतेति" श्रुतिः ।

**अपद** न० न पदम् अप्राशस्त्ये न०त० । अप्रकृष्टस्थाने सुप्तिङन्तभिन्ने च नापदं शास्त्रे प्रयुञ्जीतेति वृद्धाः ।

**अपदान** न० अपदायति परिशुध्यति येन कर्मणा अप+दैप—शोधने करणे ल्युट् । परिशुद्धाचरणे येन कर्मणा सर्व्वैः परिशुद्धत्वेन ज्ञायते तस्मिन् कर्मणि । [सन्निकृष्टे, संसक्ते च ।

**अपदान्तर** त्रि० न पदान्तरं व्यवधानं यत्र । अव्यवहिते,